Sadvidya Journal of Sanskrit and Indian Knowledge Systems
DOI: 10.18311/sadvid/2024/49109

कौण्डभट्टमतेन नञर्थनिर्णयः

डा. गोपीकृष्णन् रघुः

सहायकाचार्यः, संस्कृत-दर्शनविभागः, रामकृष्णमिशन् विवेकानन्द-शैक्षणिक-शोधसंस्था, बेलूरमठः, हौरा, पश्चिमबङ्गः – 711202; reghu.gopikrishnan@gamil.com

प्रबन्धसारः

नञ् इति निपातः लोके शास्त्रे च अत्यन्तं प्रसिद्धः। तस्य चार्थस्य विषये विवदन्ते शास्त्रकाराः। नैय्यायिकमींमासकौ नञः अभावार्थकत्वं मन्वानाः प्रयोगप्रसङ्गेन क्वचिदत्यन्ताभावः क्वचिच्च अन्योन्याभावः च तदर्थः इति वदन्ति। वैय्याकरणाः नञः पर्युदासप्रसज्यप्रतिषेध भेदमङ्गीकृत्य अर्थभेदं ब्रुवन्ति। तत्र च विद्यते मतभेदः। नागेशास्तु पर्युदासस्य आरोपितविषयत्वर्थः, प्रसज्यप्रतिषेधे समस्तस्य अत्यन्ताभावः, असमस्तस्य च प्रसङ्गात् अत्यन्ताभावान्योन्याभावौ अर्थौ इति वदति। कैय्यटदीक्षितादयस्तु आरोपितत्वमेव सर्वेषामर्थः इति वदन्ति। किन्तु कौण्डभट्टः भूषणसारे तस्य अभावार्थत्वं प्रतिपादयति। पत्रेऽस्मिन् भूषणसारदिशा नञर्थः कथम् अभावः इति आलोच्यते।

कुञ्चीशब्दाः नञ्, अभावः, आरोपितत्वम्, नञ्समासः, नञर्थः, विशेषणम्, विशेष्यम्, आरोपः, निपातः, प्रतियोगी।

1. उपोत्घातः

नञ् इति शब्दस्तु निपातेष्वन्यतमश्चेदपि वर्तते तस्य काचित् महिमा निपातान्तरापेक्षया। अयेवैकः तादृशो निपातः यद्विषये शास्त्रेषु अत्यधिकचर्चा समभवत्। तस्य च कारणमस्य लोके प्रयोगाधिक्यमेव। निषेधाभावयोः बोधनं एनमन्तरा नैव जायत इत्यतः अस्य प्रयोगविषयः महान्। अतः कारणात् शास्त्रेष्वपि बहुचर्चितोऽयं निपातः।

तस्य चार्थस्य विषये विवदन्ते शास्त्रकाराः। नैय्यायिकमींमासकौ नञः अभावार्थकत्वं मन्वानाः प्रयोगप्रसङ्गेन क्वचिदत्यन्ताभावः क्वचिच्च अन्योन्याभावः च तदर्थः इति वदन्ति। वैय्याकरणाः नञः पर्युदासप्रसज्यप्रतिषेध भेदमङ्गीकृत्य अर्थभेदं ब्रुवन्ति। तत्र च विद्यते मतभेदः। नागेशास्तु पर्युदासस्य आरोपितविषयत्वर्थः, प्रसज्यप्रतिषेधे समस्तस्य अत्यन्ताभावः, असमस्तस्य च प्रसङ्गात् अत्यन्ताभावान्योन्याभावौ अर्थौ इति वदति। कैय्यटदीक्षितादयस्तु आरोपितत्वमेव सर्वेषामर्थः इति वदन्ति। किन्तु कौण्डभट्टः भूषणसारे भिन्नमेवार्थं प्रतिपादयति। पत्रेऽस्मिन् अधुना भूषणसारदिशा नञर्थः आलोच्यते।

2. आरोपितत्वं नञर्थः इति पक्षः

नञर्थः कः तस्य च समासे कथमन्वयेत्यादिविषयान् निरूपयतुमादौ कारिकया दीक्षिताद्यभिमतम् आरोपितत्वपक्षं प्रदर्शयति -

नञ्समासे चापरस्य प्राधान्यात् सर्वनामता।
आरोपितत्वं नञ्द्योत्यं नह्यसोऽप्यतिसर्ववत्
॥(वैय्याकरणभूषणसारः, ४०) इति

अस्यायमर्थः- नञ्समासे असर्वः, असः इत्यादौ अपरस्य उत्तरपदार्थस्य प्राधान्यात् विशेष्यत्वात् सर्वनामता सिद्ध्यति। अत एव आरोपितत्वं नञ्द्योत्यम् इति स्वीकार्यम्। यतो हि असः इत्यपि अतिसर्ववत् न वर्तते। अस्याशयस्तावत् न सर्वः असर्वः, न सः असः इत्यादौ नञ्समासे पदद्वयं वर्तते - पूर्वपदं (नञ्), उत्तरपदं (सर्वादिपदं) च। तत्र नञः आरोपितार्थस्वीकारे आरोपितसर्वः इति अर्थो जायते। तेन उत्तरपदार्थस्य सर्वादेः प्राधान्यं न हीयते। तेन उत्तरपदार्थस्य सर्वादेः सर्वनामसंज्ञा तत्प्रयुक्तं च कार्यं भवति। अन्यथा सर्वान् अतिक्रान्तः इति विग्रहे निष्पन्नस्य अतिसर्वः इत्यस्य सर्वकर्मकातिक्रमणकर्ता इत्यर्थो जायते। तेन सर्वशब्दस्य गौणत्वात् संज्ञोपसर्जनीभूतास्तु न सर्वादयः इति न्यायेन तस्य सर्वनामसंज्ञा न भवति। तेन अतिसर्वाय इत्येव रूपं, न तु अतिसर्वस्मै इति। एवम् असर्वः इत्यत्र नञर्थस्य प्राधान्यस्वीकारे असर्वः इत्यत्र सर्वशब्दस्य प्राधान्याभावात् ततः सर्वनामकार्याणि न स्युः, अतः सर्वनामकार्याणि यथा स्यात् तदर्थम् नञर्थस्य आरोपितार्थकत्वं स्वीकरणीयम्। तेन असर्वः इत्यस्य आरोपितसर्वः इत्यर्थस्वीकारे सर्वशब्दस्यैव प्राधान्यात् ततः सर्वनामकार्याणि भवन्ति। किञ्च, घटो नास्ति इति वाक्ये आरोपितसत्तावान् घट इति बोधः शब्दतः जायते।

*Author for correspondence

Article Received on: 15.10.2024 *Peer-reviewed* Accepted on: 06.12.2024

घटकर्तृकसत्ताभावः इति बोधस्तु आर्थिकः अर्थात् मानसिकः। अतः शब्दतो बोधे उत्तरपदार्थस्य प्राधान्यात् असर्वस्मै इत्यादौ सर्वनामकार्याणि भवन्ति।

ननु आरोपितत्वं नाम किमिति विवक्षायामुच्यते कौण्डभट्टेन आरोपितत्वं नाम आरोपविषयत्वम्।तत्र विषयत्वं सम्बन्धो वर्तते। स च संसर्गमर्यादया वर्तते। अतः अनन्यलभ्यो हि शब्दार्थः इति न्यायेन लाघवात् आरोपमात्रं नञर्थ इति स्वीक्रियते।

3. अभावः नञर्थः इति पक्षः

ननु घटो नास्ति, अब्राह्मणः इत्यादौ आरोपरूपः नञर्थःसर्वानुभवविरुद्धः, यतो हि घटो नास्ति इत्युक्ते घटकर्तृकसत्ताभावः, इत्यर्थो बुध्यते, न तु आरोपितसत्तावान् घटः इति बोधः। एवमेव अब्राह्मणः इत्यत्र ब्राह्मणभिन्न इत्येवार्थः सर्वैरनुभूयते, न तु आरोपितब्राह्मणत्ववान् इत्यादिरूपः अर्थः। अर्थात् आरोपरूपः अर्थस्तु अनुभवविरुद्धः। तस्मात् नञर्थविषये पक्षान्तरं प्रस्तूयते -

अभावो वा तदर्थोऽस्तु भाष्यस्य हि तदाशयात्।
विशेषणं विशेष्यो वा न्यायतस्त्ववधार्यताम्॥
(वैय्याकरणभूषणसारः, ४१) इति।

अस्यार्थस्तावत् वा अथवा भाष्यस्य महाभाष्यकारस्य तदाशयात् अभावपदार्थकः नञ् भवति इत्याशयात् अभावः तदर्थः नञर्थः अस्तु इति कारिकायाः पूर्वभागस्य अर्थः। आरोपो नञर्थो मास्तु, नञर्थः अभावरूपः इति भाष्यसम्मत एव। किञ्च, स नञर्थो विशेषणं भवति विशेष्यो वेति न्यायतः विचारपूर्वकम् अवधार्यम्। ननु भाष्ये कुत्र नञः अभावार्थकत्वं स्वीकृतमिति चेदुच्यते, नञः इति सूत्रभाष्ये भाष्यकारेण कः पुनरसौ नञ् इति प्रश्ने निवृत्तपदार्थकः इति प्रोक्तम्। निवृत्तं पदार्थो यस्येति विग्रहे निवृत्तपदार्थकः इति।नि-इत्युपसर्गपूर्वकात् वृत्धातोः नपुंसके भावे क्तः इति सूत्रेण भावे क्तप्रत्यये निवृत्तमिति रूपम्। निवृत्तम् इत्यस्यार्थः अभावः। तेन निवृत्तम् अभावः पदार्थो यस्य स निवृत्तपदार्थकः अभावपदार्थकः नञ् इति भाष्यकारस्यापि आशयो वर्तते।

4. नञर्थविषये कैयटमतखण्डनम्

कैयटमते नि-उपसर्गपूर्वकात् वृत्धातोः कर्मणि क्तप्रत्यये निवृत्त इति रूपम्। तेन निवृत्तः पदार्थो यस्मिन् इति विग्रहो निवृत्तपदार्थकपदस्य। निवृत्तः सादृश्यादिना अध्यारोपितः पदार्थः मुख्यं ब्राह्मण्यं यस्मिन् स अध्यारोपितब्राह्मण्यः क्षत्रियादिः नञर्थो भवति इति कैयटमतम्। किन्तु इदं मतं समीचीनं नास्ति यतो हि अध्यारोपितब्राह्मण्यः क्षत्रियादिः नञः अर्थो भवितुं नार्हति तस्य नञवाच्यत्वात्, अपि तु स तात्पर्यार्थ एव। अन्यथा सादृश्यादेरपि वाच्यतापत्तेः। अत्र आदिपदेन अभावादिकं गृह्यते। तथाहि -

तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः॥ इति

अर्थात् सादृश्यम्, अभावः, अन्यत्वम्, अल्पता, अप्राशस्त्यं, विरोधः चेत् षट् नञर्थाः। अत्र ये सादृश्यादयोऽर्थास्ते न शाब्दाः नाम शब्दतः भासमानाः, अपि तु आर्थिका एव। शब्दतः आरोपितब्राह्मणत्व-विशिष्टादयः अर्थाः बुध्यन्ते, अर्थतस्तु ब्राह्मणसदृशादयोऽर्थाः ।

5. नञर्थाभावः विशेषणम् इति पक्षे विचारः

नञ्समासे नञर्थाभावः विशेषणं वर्तते। ननु अभावस्य विशेषणत्वात् कस्तावत् विशेष्य इति चेदुच्यते ग्रन्थकारेण नञर्थः प्रतियोगिनि विशेषणं भवति। यस्याभावः स प्रतियोगी। यथा घटस्य अभावः इत्यत्र घटः प्रतियोगी भवति। तेन असर्वः इत्यस्य भेदप्रतियोगी सर्वः इति बोधः। तेन सर्वशब्दस्य प्राधान्यात् सर्वनामसंज्ञा भवति। अनेकमन्यपदार्थे इति सूत्रे प्रयुक्तस्य अनेकपदस्य अभावप्रतियोग्येकः इत्यर्थस्वीकारे एव ततः एकवचनत्वम्। अभावस्य विशेषणत्वास्वीकारे न एकम् = अनेकम् इति नञ्समासेन निष्पन्नः अनेकशब्दः द्वयोः बहूनां वा वाचकः स्यात्। विशेषणत्वस्वीकारात् एव अस्मिन् सूत्रे अनेकपदात् एकत्वव्यवहारः सङ्गच्छते। किञ्च, कविवरमाघप्रणीते शिशुपालवधनामके महाकाव्ये सेव्यतेऽनेकया सन्नतापाङ्ग्या इति प्रयोगो दृश्यते। तत्रापि नञर्थस्य अप्रधानत्वात् उत्तरपदार्थस्य च प्रधानत्वात् एकवचनं सूपपन्नं भवति।

किञ्च, अब्राह्मणः इत्यादौ भेदप्रतियोगी ब्राह्मणः इत्यर्थस्वीकारादेव तत्पुरुषसमासः सङ्गच्छते। यतो हि प्रायेण उत्तरपदार्थप्रधानस्तत्पुरुषसमासो भवति। एवम् अत्वं भवसि, अनहं भवामि इत्यादि पुरुषवचनादिव्यवस्था सङ्गच्छते अभावस्य विशेषणत्वस्वीकारादेव। अन्यथा अत्वं भवति, अनहं भवामि इत्यादिरूपः अनिष्टप्रयोग आपद्येत। तथाहि त्वदभावो मदभावः इतिवदभावांशे युष्मदस्मदोरन्वयेन युष्मत्सामानाधिकरण्यस्य तिङ्क्ष्वसत्त्वात् युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः, अस्मद्युत्तमः इत्यादिभिः पुरुषव्यवस्था न स्यात्। परन्तु अभावस्य विशेषणत्वस्वीकारात् भेदप्रतियोगी त्वं, भेदप्रतियोगी अहम् इत्यर्थो जायते। तेन

भेदप्रतियोगित्ववदभिन्नाश्रयिका भवनक्रिया इत्यन्वयात् सामानाधिकरण्यस्य उपपन्नत्वात् पुरुषव्यवस्था सूपपादा।

6. नञर्थाभावः विशेष्यः इति पक्षे विचारः

अस्मिन् पक्षे अभावरूपः नञर्थः प्रतियोगिविशेषणं न, अपि तु प्रतियोगिविशेष्य एव। तेन अघटः इत्यस्यार्थो भवति घटप्रतियोगिकाभावः इति।

अत्र एका शङ्का उत्पद्यते यत् नञर्थाभावः विशेष्यः चेत् असः शिवः अनेषः छात्रः इत्यादिप्रयोगाणां सिद्धिः भवितुं नार्हति, यतो हि नञर्थस्य विशेष्यत्वे असः शिवः इत्यस्यार्थो भवति तद्भिन्नः शिवः इति। तेन तच्छब्दस्य विशेषणत्वात् गौणत्वेन संज्ञोपसर्जनीभूतास्तु न सर्वादयः इति वचनात् तच्छब्दस्य सर्वनामत्वाभावात् त्यदादीनामः इति सर्वनामप्रयुक्तकार्याभावे असः इति रूपं न भवेत्। अत्रोच्यते गौणत्वेऽपि नञ्समासे एतत्तदोः सुलोपोऽकोरनञ्समासे हलि इति ज्ञापकात् सर्वनामसंज्ञा नानुपपन्ना। अर्थात् असः शिवः इत्यत्र सुलोपवारणाय अस्मिन् सूत्रे अनञ्समासे इति पदं प्रयुक्तम। नञ्समासे समासघटकाभ्याम् एतत्तद्भ्यां परस्य सुप्रत्ययस्य लोपो न स्यात् इत्येतदर्थम् अनञ्समासे इति विशेषणं दत्तम्। एवं नञ्समासे एतत्तदोः गौणत्वात् सर्वनामत्वाभावादेव सुलोपाभावे पुनः तद्वारणाय अनञ्समासे इति यद् विशेषणं तद्व्यर्थं सत् ज्ञापयति यत् नञ्समासे एतत्तदोः गौणत्वेऽपि सर्वनामकार्याणि भवन्ति इति। किञ्च, अकोः इति निर्देशात् असर्वनाम्नः सर्वनामविहिताकजसम्भवेन तत्पर्युदासात् सर्वनाम्नोरेव तयोर्ग्रहणं निश्चीयते।

अनेकमन्यपदार्थे इत्यादावेकवचनं विशेष्यानुरोधात्। सुबामन्त्रिते पराङ्गवत्स्वरे इत्यतः अनुवर्तमानं सुब्ग्रहणं विशेष्यमेकवचनान्तमेव। किञ्च, द्वयोः पदयोः बहुव्रीहिसमासो भवति, बहूनामपि पदानां भवति। अनेकशब्दात् द्विवचने क्रियमाणे द्वयोरेव सुबन्तयोः बहुव्रीहिः भविष्यति, न तु बहूनाम्। अनेकपदात् बहुवचने क्रियमाणे द्वयोः पदयोः बहुव्रीहिः न स्यात्। अतः उभयसंग्रहाय अत्र जात्यभिप्रायम्, औत्सर्गिकं वा एकवचनम्।

सेव्यतेऽनेकया इत्यत्रापि योषया इति विशेष्यानुरोधात्, न तु उत्तपदार्थस्य प्रधानत्वात् एकवचनमिति मन्तव्यम्। किञ्चात्र, प्रत्येकं सेवनान्वयबोधनाय चैकवचनम्। तेन श्रीकृष्णः अनेकयोषासु प्रत्येकम् एकैकया योषया सेव्यमानो वर्तते इत्यर्थो जायते। तस्मात् नञ्समासे पूर्वपदार्थस्य नञर्थस्य प्राधान्यं स्वीकार्यम्। तेन पतन्त्यनेके जलधेरिवोर्मयः इत्यादौ नञर्थस्य प्रधानत्वस्वीकारे एव बहुवचनम् उपपद्यते। अन्यथा अनेक इत्यत्र उत्तरपदार्थस्य एकशब्दस्य प्रधानत्वात् एकवचनम् एव स्यात्, न तु बहुवचनम्।

ननु नञ्समासे पूर्वपदार्थस्य नञर्थस्य प्राधान्यस्वीकारे अत्वम्, अनहम् इत्यादेः अर्थो भविष्यति त्वद्भिन्नः, मद्भिन्न इति। तेन युष्मदर्थेन अस्मदर्थेन वा सह तिपः सामानाधिकरण्याभावात् पुरुषव्यवस्था न स्यादिति चेदुच्यते, अत्र युष्मदः अस्मदश्च तद्भिन्ने लक्षणा क्रियते, नञ् चात्र तात्पर्यग्राहकम्। तेन भिन्नेन युष्मदर्थेन सह तिङः सामानाधिकरण्यात् पुरुषव्यवस्था सङ्गच्छते। अतः अत्वं भवसि इत्यस्य शाब्दबोधो भवति त्वदभिन्नाभिन्नाश्रयिका भवनक्रिया इति। एवं न त्वं पचसि इत्यस्य शाब्दबोधो भवति त्वदभिन्नाश्रयकपाकानुकूलभावनाभावः इति। घटो नास्ति इत्यत्र घटाभिन्नाश्रयकास्तित्वाभाव इति रीत्या बोधः, असमस्तनञः क्रियायामेवान्वयात्।

अयं नञर्थः कुत्रचित् अत्यन्ताभावरूपेण प्रतीयते, कुत्रचिच्च अन्योन्याभावरूपेण। तेन नञर्थः अभावत्वेन रूपेण न शक्यः अपि तु अत्यन्ताभावत्व-अन्योन्याभावत्वादिरूपेण शक्यः।

7. उपसंहारः

इत्थं नञः अभावार्थे अङ्गीक्रियमाणे ये दोषाः तत्र आपादिताः तेषां युक्तियुक्तसमाधानानि कौण्डभट्टेन प्रदत्ता। यद्यपि पक्षद्वयमपि न्यरूपदत्र तथापि अभावार्थकत्वपक्षं विशिष्य युक्त्या समर्थयन् कौण्डभट्टः स्वस्य अभावार्थविषयकपक्षपतमपि प्राकटयत्। एवं च कौण्डभट्टनये नञः अभावार्थकत्वमेव युक्तमिति सिद्ध्यति। इदं मतं नैय्यायिकमीमांसकयोः मतेन साम्यं भजते। नागेशस्यापि अभावपक्षे एव तात्पर्यमिति मञ्जूषापरिशीलनेन ज्ञायते। तद्विषये तु पृथगेव परिशीलनं कर्तुं शक्यते। तस्य चाभावस्य क्वचित् विशेषणत्वं क्वचिद्विशेष्यत्वं च भवितुमर्हतीति नास्ति तत्र कश्चन क्लेशः। कुत्र विशेषणत्वं कुत्र वा विशेष्यत्वमिति तु लक्ष्यानुसारिनिर्णयः कार्यः इति शम्।

8. उपयुक्तग्रन्थसूची

1) पञ्चोलिः, बालकृष्णः (सं). (1987). वैयाकरणभूषणसारः-प्रभादर्पणयुतः. वारणसी: चौखम्बासुरभारतीप्रकशनम्।
2) सत्यनारायणशास्त्री, कोम्पेल्ल (सं). (2016) वैयाकरणभूषणसारः-तत्त्वदर्शिनीव्याख्यायुतः. तिरुपतिः श्रीवेङ्कटेश्वरवैदिक-विश्वविद्यालयः।
3) त्रिपाठी, रामप्रसादः(सं) (1977). वैयाकरणसिद्धान्तमञ्जूषा. वारणसी: सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः।
4) आचार्यः रामकृष्णमाचार्यः, कं.वे. (2010) भूषणसारतत्वप्रकाशिका. तिरुपतिः: राष्ट्रियसंस्कृतविद्यापीठम्।